# Bhustutih

# ભૂસ્તુતિઃ

## Document Information

Text title : bhUstutiH 1

File name : bhUstutiH.itx

Category : devii, otherforms, devI, vedAnta-deshika

Location : doc_devii

Author : vedAntadeshika

Proofread by : PSA Easwaran, Nivedita R.

Latest update : October 16, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 17, 2023

*sanskritdocuments.org*

# ભૂસ્તુતિઃ

વેદાન્તદેશિકકૃતા ।

સઙ્કલ્પકલ્પલતિકામવધિં ક્ષમાયાઃ
    સ્વેચ્છાવરાહમહિષીં સુલભાનુકમ્પામ્ ।
વિશ્વસ્ય માતરમકિઞ્ચનકામધેનું
    વિશ્વમ્ભરામશરણઃ શરણં પ્રપદ્યે ॥ ૧॥

ત્વાં વ્યાહૃતિઃ પ્રથમતઃ પ્રણવઃ પ્રિયં તે
    સંવેદયત્યખિલમન્ત્રગણસ્તમેવ ।
ઇત્થં પ્રતીતવિભવામિતરેષ્વિદાનીં
    સ્તોતું યથાવદવને ક ઇવાર્હતિ ત્વામ્ ॥ ૨॥

નિત્યં હિતાહિતવિપર્યયબદ્ધભાવે
    ત્વદ્વીક્ષણૈકવિનિવર્ત્યબહુવ્યપાયે ।
મુગ્ધાક્ષરૈરખિલધારિણિ મોદમાના
    માતઃ સ્તનન્ધયધિયં મયિ વર્તયેથાઃ ॥ ૩॥

સઙ્કલ્પકિઙ્કરચરાચરચક્રવાલં
    સર્વાતિશાયિનમનન્તશયસ્ય પુંસઃ ।
ભૂમાનમાત્મવિભવૈઃ પુનરુક્તયન્તી
    વાચામભૂમિરપિ ભૂમિરસિ ત્વમેકા ॥ ૪॥

વેધસ્તૃણાવધિ વિહારપરિચ્છદં તે
    વિશ્વં ચરાચરતયા વ્યતિભિદ્યમાનમ્ ।
અમ્બ ત્વદાશ્રિતતયા પરિપોષયન્તી
    વિશ્વમ્ભરસ્ય દયિતાઽસિ તદેકનામા ॥ ૫॥

સર્વંસહેત્યવનિરિત્યચલેતિ માતઃ
    વિશ્વમ્ભરેતિ વિપુલેતિ વસુન્ધરેતિ ।
અન્યાનિ ચાન્યવિમુખાન્યભિધાનવૃત્ત્યા

નામાન્યમૂનિ કથયન્તિ તવાનુભાવમ્ ॥ ૬॥

તાપાન્ ક્ષિપન્ પ્રસવિતા સુમનોગણાનાં
પ્રચ્છાયશીતલતલઃ પ્રદિશન્ ફલાનિ ।
ત્વત્સઙ્ગમાદ્ભવતિ માધવિ લબ્ધપોષઃ
શાખાશતૈરધિગતો હરિચન્દનોઽસૌ ॥ ૭॥

સ્મેરેણ વર્ધિતરસત્ય મુખેન્દુના તે
નિષ્પન્દતાં વિજહતો નિજયા પ્રકૃત્યા ।
વિશ્રાન્તિભૂમિરસિ તત્ત્વતરઙ્ગપઙ્ક્તેઃ
વેલેવ વિષ્ણુજલધેરપૃથગ્ભવન્તી ॥ ૮॥

સ્વાભાવિકે વસુમતિ શ્રુતિભિર્વિભાવ્યે
પત્યુર્મહિમ્નિ ભવતીં પ્રતિપન્નવાસામ્ ।
શઙ્કે વિમાનવહનપ્રતિમાસમાનાઃ
સ્તમ્બેરમપ્રભૃતયોઽપિ વહન્તિ સત્ત્વાઃ ॥ ૯॥

સમ્ભાવયન્ મધુરિપુઃ પ્રણયાનુરોધાત્
વક્ષઃસ્થલેન વરુણાલયરાજકન્યામ્ ।
વિશ્વમ્ભરે બહુમુખપ્રતિપન્નભોગઃ
શેષાત્મના તુ ભવતીં શિરસા દધાતિ ॥ ૧૦॥

ક્રીડાવરાહદયિતે કૃતિનઃ ક્ષિતીન્દ્રાઃ
સઙ્ક્રન્દનસ્તદિતરેઽપિ દિશામધીશાઃ ।
આમોદયન્તિ ભુવનાન્યલિકાશ્રિતાનાં
અમ્બ ત્વદઙ્ઘ્રિરજસાં પરિણામભેદૈઃ ॥ ૧૧॥

ભૂતેષુ યત્ત્વદભિમાનવિશેષપાત્રં
પોષં તદેવ ભજતીતિ વિભાવયન્તઃ ।
ભૂતં પ્રભૂતગુણપઞ્ચકમાદ્યમેતત્
પ્રાયો નિદર્શનતયા પ્રતિપાદયન્તિ ॥ ૧૨॥

કાન્તસ્તવૈષ કરુણાજલધિઃ પ્રજાનાં
આજ્ઞાતિલઙ્ઘનવશાદુપજાતરોષઃ ।
અહ્નાય વિશ્વજનનિ ક્ષમયા ભવત્યા
સર્વાવગાહનસહામુપયાત્યવસ્થામ્ ॥ ૧૩॥

આશ્વાસનાય જગતાં પુરુષે પરસ્મિન્
    આપન્નરક્ષણદશામભિનેતુકામે ।
અન્તર્હિતેતરગુણાદબલાસ્વભાવાત્
    ઔદન્વતે પયસિ મજ્જનમભ્યનૈષીઃ ॥ ૧૪॥

પૂર્વં વરાહવપુષા પુરુષોત્તમેન
    પ્રીતેન ભોગિસદને સમુદીક્ષિતાયાઃ ।
પાદાહતાઃ પ્રલયવારિધયસ્તવાસન્
    ઉદ્વાહમઙ્ગલવિધેરુચિતા મૃદઙ્ગાઃ ॥ ૧૫॥

વ્યોમાતિલઙ્ઘિનિ વિભોઃ પ્રલયામ્બુરાશૌ
    વેશન્તલેશ ઇવ માતુમશક્યમૂર્તેઃ ।
સદ્યઃ સમુદ્રવસને સરસૈરકાર્ષીઃ
    આનન્દસાગરમપારમપાઙ્ગપાતૈઃ ॥ ૧૬॥

દંષ્ટ્રાવિદારિતમહાસુરશોણિતાક્તૈઃ
    અઙ્ગૈઃ પ્રિયસ્તવ દધે પરિરમ્ભલીલામ્ ।
સા તે પયોધિજલકેલિસમુત્થિતાયાઃ
    સૈરન્ધ્રિકેવ વિદધે નવમઙ્ગરાગમ્ ॥ ૧૭॥

અન્યોન્યસંવલનજૃમ્ભિતતૂર્યઘોષૈઃ
    સંવર્તસિન્ધુસલિલૈર્વિહિતાભિષેકા ।
એકાતપત્રયસિ વિશ્વમિદં ગુણૈઃ સ્વૈઃ
    અધ્યાસ્ય ભર્તુરધિકોન્નતમંસપીઠમ્ ॥ ૧૮॥

ભર્તુસ્તમાલરુચિરે ભુજમધ્યભાગે
    પર્યાયમૌક્તિકવતી પૃષતૈઃ પયોધેઃ ।
તાપાનુબન્ધશમની જગતાં ત્રયાણાં
    તારાપથે સ્ફુરસિ તારકિતા નિશેવ ॥ ૧૯॥

આસક્તવાસવશરાસનપલ્લવૈસ્ત્વાં
    સંવૃદ્ધયે શુભતટિદ્ગુણજાલરમ્યૈઃ ।
દેવેશદિવ્યમહિષીં ધૃતસિન્ધુતોયૈઃ
    જીમૂતરત્નકલશૈરભિષિઞ્ચતિ દ્યૌઃ ॥ ૨૦॥

આવિર્મદૈરમરદન્તિભિરુહ્યમાનાં
    રત્નાકરેણ રુચિરાં રશનાગુણેન ।

માતસ્ત્રિલોકજનનીં વનમાલિનીં ત્વાં
    માયાવરાહમહિષીમવયન્તિ સન્તઃ ॥ ૨૧॥

નિષ્કણ્ટકપ્રશમયોગનિષેવણીયાં
    છાયાવિશેષપરિભૂતસમસ્તતાપામ્ ।
સ્વર્ગાપવર્ગસરણિં ભવતીમુશન્તિ
    સ્વચ્છન્દસૂકરવધૂમવધૂતપઙ્કામ્ ॥ ૨૨॥

ગણ્ડોજ્જ્વલાં ગહનકુન્તલદર્શનીયાં
    શૈલસ્તનીં તરલનિર્ઝરલમ્બહારામ્ ।
શ્યામાં સ્વતસ્ત્રિયુગસૂકરગેહિનિ ત્વં
    વ્યક્તિં સમુદ્રવસનામુભયીં બિભર્ષિ ॥ ૨૩॥

નિઃસંશયૈર્નિગમસીમનિ વિષ્ણુપત્નિ
    પ્રખ્યાપિતં ભૃગુમુખૈર્મુનિભિઃ પ્રતીતૈઃ ।
પશ્યન્ત્યનન્યપરધીરસસંસ્તુતેન
    સન્તઃ સમાધિનયનેન તવાનુભાવમ્ ॥ ૨૪॥

સઞ્ચોદિતા કરુણયા ચતુરઃ પુમર્થાન્
    વ્યાતન્વતી વિવિધમન્ત્રગણોપગીતા ।
સઞ્ચિન્ત્યસે વસુમતિ સ્થિરભક્તિબન્ધૈઃ
    અન્તર્બહિશ્ચ બહુધા પ્રણિધાનદક્ષૈઃ ॥ ૨૫॥

ક્રીડાગૃહીતકમલાદિવિશેષચિહ્નાં
    વિશ્રાણિતાભયકરાં વસુધે સભૂતિમ્ ।
દૌર્ગત્યદુર્વિષવિનાશસુધાનદીં ત્વાં
    સઞ્ચિન્તયન્ હિ લભતે ધનદાધિકારમ્ ॥ ૨૬॥

ઉદ્વેલકલ્મષપરમ્પરિતાદમર્ષાત્
    ઉત્તંસિતેન હરિમઞ્જલિનાઽપ્યધૃષ્યમ્ ।
આકસ્મિકોઽયમધિગમ્યયતિ પ્રજાનાં
    અમ્બ ત્વદીયકરુણાપરિણામ એવ ॥ ૨૭॥

પ્રત્યેકમબ્દનિયુતૈરપિ દુર્વ્યપોહાત્
    પ્રાપ્તે વિપાકસમયે જનિતાનુતાપાત્ ।
નિત્યાપરાધનિવહાચ્ચકિતસ્ય જન્તોઃ
    ગન્તું મુકુન્દચરણૌ શરણં ક્ષમે ત્વમ્ ॥ ૨૮॥

ત્રાણાભિસન્ધિ સુભગેઽપિ સદા મુકુન્દે
    સંસારતન્ત્રવહનેન વિલમ્બમાને ।
રક્ષાવિધૌ તનુભૃતામનઘાનુકમ્પા
    માતઃ સ્વયં વિતનુષે મહતીમપેક્ષામ્ ॥ ૨૯॥

ધર્મદ્રુહં સકલદુષ્કૃતિસાર્વભૌમં
    આત્માનભિજ્ઞમનુતાપલવોજ્ઝિતં મામ્ ।
વૈતાનસૂકરપતેશ્ચરણારવિન્દે
    સર્વંસહે નનુ સમર્પયિતું ક્ષમા ત્વમ્ ॥ ૩૦॥

તાપત્રયીં નિરવધિં ભવતીદયાર્દ્રાઃ
    સંસારઘર્મજનિતાં સપદિ ક્ષિપન્તઃ ।
માતર્ભજન્તુ મધુરામૃતવર્ષમૈત્રીં
    માયાવરાહદયિતે મયિ તે કટાક્ષાઃ ॥ ૩૧॥

પત્યુર્દક્ષિણપાણિપઙ્કજપુટે વિન્યસ્તપાદામ્બુજા
    વામં પન્નગસાર્વભૌમસદૃશં પર્યઙ્કયન્તી ભુજમ્ ।
પોત્રસ્પર્શલસત્કપોલફલકા ફુલ્લારવિન્દેક્ષણા
    સા મે પુષ્યતુ મઙ્ગલાન્યનુદિનં સર્વાણિ સર્વંસહા ॥ ૩૨॥

અસ્યેશાના જગત ઇતિ યા શ્રૂયતે વિષ્ણુપત્ની
    તસ્યાઃ સ્તોત્રં વિરચિતમિદં વેઙ્કટેશેન ભક્ત્યા ।
શ્રદ્ધાભક્તિપ્રચયગુરુણા ચેતસા સંસ્તુવાનો
    યદ્યત્કામઃ સપદિ લભતે તત્ર તત્ર પ્રતિષ્ઠામ્ ॥ ૩૩॥

ઇતિ વેદાન્તદેશિકકૃતા ભૂસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran, Nivedita R

*Bhustutih*

pdf was typeset on March 17, 2023

Please send corrections to *sanskrit@cheerful.com*